# Kuberakritam Somanatha Stotram

# કુબેરકૃતં સોમનાથસ્તોત્રમ્

## Document Information

Text title : Kuberakritam Somanatha Stotram

File name : kuberakRRitaMsomanAthastotram.itx

Category : shiva, skandapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | adhyAya 290/23-35||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# કુબેરકૃતં સોમનાથસ્તોત્રમ્

કુબેર ઇતિ ધર્માત્મા શ્રુતશીલસમન્વિતઃ ।
લિઙ્ગં પ્રતિષ્ઠયામાસ ન્યઙ્કુમત્યાશ્ચ પૂર્વતઃ ॥ ૨૧॥

કૌબેરાત્પશ્ચિમે ભાગે સોમનાથેતિ વિશ્રુતમ્ ।
સમ્પૂજ્ય ચ યથેશાનં ન્યઙ્કુમત્યાસ્તટે શુભે ।
સ્તોત્રેણાનેન ચાસ્તૌષીદ્ભક્ત્યા તં સર્વકામદમ્ ॥ ૨૨॥

મૂર્તિઃ ક્વાપિ મહેશ્વરસ્ય મહતી યજ્ઞસ્ય મૂલોદયા
તુમ્બી તુઙ્ગફલાવતી ચ શતશો બ્રહ્માણ્ડકોટિસ્તથા ।
યન્માનં ન પિતામહો ન ચ હરિર્બ્રહ્માણ્ડમધ્યસ્થિતો
જાનાત્યન્યસુરેષુ કા ચ ગણના સા સન્તતં વોઽવતાત્ ॥ ૨૩॥

નમામ્યહં દેવમજં પુરાણમુપેન્દ્રમિન્દ્રાવરરાજજુષ્ટમ્ ।
શશાઙ્કસૂર્યાગ્નિસમાનનેત્રં વૃષેન્દ્રચિહ્નં પ્રલયાદિહેતુમ્ ॥ ૨૪॥

સર્વેશ્વરૈકત્રિબલૈકબન્ધું યોગાધિગમ્યં જગતોઽધિવાસમ્ ।
તં વિસ્મયાધારમનન્તશક્તિં જ્ઞાનોદ્ભવં ધૈર્યગુણાધિકં ચ ॥ ૨૫॥

પિનાકપાશાઙ્કુશશૂલહસ્તં કપર્દિનં મેઘસમાનઘોષમ્ ।
સકાલકણ્ઠં સ્ફટિકાવભાસં નમામિ શમ્ભું ભુવનૈકનાથમ્ ॥ ૨૬॥

કપાલિનં માલિનમાદિદેવં જટાધરં ભીમભુજઙ્ગહારમ્ ।
પ્રભાસિતારં ચ સહસ્રમૂર્તિં સહસ્રશીર્ષં પુરુષં વિશિષ્ટમ્ ॥ ૨૭॥

યદક્ષરં નિર્ગુણમપ્રમેયં સજ્યોતિરેકં પ્રવદન્તિ સન્તઃ ।
દૂરઙ્ગમં વેદ્યમનિન્દ્યવન્દ્યં સર્વેષુ હૃત્સ્થં પરમં પવિત્રમ્ ॥ ૨૮॥

તેજોનિભં બાલમૃગાઙ્કમૌલિં નમામિ રુદ્રં સ્ફુરદુગ્રવક્ત્રમ્ ।
કાલેન્ધનં કામદમસ્તસઙ્ગં ધર્માસનસ્થં પ્રકૃતિદ્વયસ્થમ્ ॥ ૨૯॥

અતીન્દ્રિયં વિશ્વભુજં જિતારિં ગુણત્રયાતીતમજં નિરીહમ્ ।

તમોમયં વેદમયં ચિદંશં પ્રજાપતીશં પુરુહૂતમિન્દ્રમ્ ।
અનાગતૈકધ્વનિરૂપમાદ્યં ધ્યાયન્તિ યં યોગવિદો યતીન્દ્રાઃ ॥ ૧.૨૯૦.૩૦॥

સંસારપાશચ્છિદુરં વિમુક્તઃ પુનઃ પુનસ્ત્વાં પ્રણમામિ દેવમ્ ॥ ૩૧॥

નિરૂપમાસ્યં ચ બલપ્રભાવં ન ચ સ્વભાવં પરમસ્ય પુંસઃ ।
વિજ્ઞાયતે વિષ્ણુપિતામહાદ્યૈસ્તં વામદેવં પ્રણમામ્યચિન્ત્યમ્ ॥ ૩૨॥

શિવં સમારાધ્ય તમુગ્રમૂર્ત્તિં પપૌ સમુદ્રં ભગવાનગસ્ત્યઃ ।
લેભે દિલીપોઽપ્યખિલાંશ્ચ કામાંસ્તં વિશ્વયોનિં શરણં પ્રપદ્યે ॥ ૩૩॥

દેવેન્દ્રવન્દ્યોદ્ધર મામનાથં શમ્ભો કૃપાકારુણિકઃ કિલ ત્વમ્ ।
દુઃખાઽર્ણવે મગ્નમુમેશ દીનં સમુદ્ધર ત્વં ભવ શઙ્કરોઽસિ ॥ ૩૪॥

સમ્પૂજયન્તો દિવિ દેવસઙ્ઘા બ્રહ્મેન્દ્રરુદ્રા વિહરન્તિ કામમ્ ।
તં સ્તૌમિ નૌમીહ જપામિ શર્વં વન્દેઽભિવન્દ્યં શરણં પ્રપન્નઃ ॥ ૩૫॥

સ્તુત્વૈવમીશં વિરરામ યાવત્તાવત્સ રુદ્રોઽર્કસહસ્રતેજાઃ ।
દદૌ ચ તસ્મૈ વરદોઽન્ધકારિર્વરત્રયં વૈશ્રવણાય દેવઃ ।
સખ્યં ચ દિક્પાલપદં ચતુર્થં ધનાધિપત્યં ચ દિવૌકસાં ચ ॥ ૩૬॥

ઇતિ શ્રીસ્કન્દપુરાણે પ્રભાસખણ્ડે પ્રભાસક્ષેત્રમાહાત્મ્યે
નવત્યધિકદ્વિશતતમાધ્યાયાન્તર્ગતં કહબેરકૃતં
સોમનાથસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । પ્રભાસખણ્ડ । અધ્યાય ૨૯૦/૨૩-૩૫॥

skandapurANa . prabhAsakhaNDa . adhyAya 290/23-35..

Proofread by PSA Easwaran

*Kuberakritam Somanatha Stotram*

pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*